एवमुक्ते भगवानायुष्मंतं सुभूतिमेतदवोचत् साधु साधु सुभूते एवमेतत्सुभूते एवमेतद्यथा वदसि। अनुपरिगृहीतास्तथागतेन बोधिसत्त्वा महासत्त्वाः परमेणानुग्रहेण परींदितास्तथागतेन बोधिसत्त्वा महासत्त्वाः परमया परींदनया। तेन हि सुभूते शृणु साधु च सुष्ठु च मनसिकुरु। भाषिष्येऽहं ते यथा बोधिसत्त्वयानसंप्रस्थितेन स्थातव्यं यथा प्रतिपत्तव्यं यथा चित्तं प्रग्रहीतव्यं। एवं भगवन्नित्यायुष्मान्सुभूतिर्भगवतः प्रत्यश्रौषीत्[4] ॥२॥

भगवानस्यैतद[5]वोचत्। इह सुभूते बोधिसत्त्वयानसंप्रस्थितेनैवं चित्तमुत्पादयितव्यं यावंतः सुभूते सत्त्वाः सत्त्वधातौ सत्त्वसंग्रहेण संगृहीता अंडजा वा जरायुजा वा संस्वेदजा वौपपादुका वा रूपिणो वारूपिणो वा संज्ञिनो वासंज्ञिनो वा नैव संज्ञिनो नासंज्ञिनो[6] वा यावान्कश्चित्सत्त्वधातुर्प्रज्ञप्यमानः प्रज्ञप्यते ते च

[1] अंजलिं J. अंजलि Ch. अंजालि T. [2] अनुगृहीताः J. [3] Cf. § 17.
[4] प्रतिश्रौषीत् T. [5] भगवानेतदवोचत् J.; no MS. has अस्मै तद°. [6] नैव संज्ञिनो वोऽसंज्ञिन J. नैव संज्ञिनो वासंज्ञिनो वा संज्ञिनो Ch. नैवासंज्ञिनो वा संज्ञिनो वासंज्ञिनो T.

मया सर्वेऽनुपधिशेषे निर्वाणधातौ परिनिर्वापयितव्याः। एव-मपरिमाणानपि सत्त्वान्परिनिर्वाप्य न कश्चित्सत्त्वः परिनिर्वापितो भवति। तत्कस्य हेतोः। सचेत्सुभूते बोधिसत्त्वस्य सत्त्वसंज्ञा प्रवर्तेत न स बोधिसत्त्व इति वक्तव्यः। तत्कस्य हेतोः। न स सुभूते बोधिसत्त्वो वक्तव्यो यस्य[1] सत्त्वसंज्ञा प्रवर्तेत जीवसंज्ञा वा पुद्गलसंज्ञा वा प्रवर्तेत[2] ॥३॥

अपि तु खलु पुनः सुभूते न बोधिसत्त्वेन वस्तुप्रतिष्ठितेन दानं दातव्यं न क्वचित्प्रतिष्ठितेन दानं दातव्यं न रूपप्रतिष्ठितेन दानं दातव्यं न शब्दगंधरसस्प्रष्टव्यधर्मेषु प्रतिष्ठितेन दानं दातव्यं[3]। एवं हि सुभूते बोधिसत्त्वेन महासत्त्वेन दानं दातव्यं यथा न निमित्त-संज्ञायामपि प्रतितिष्ठेत्। तत्कस्य हेतोः। यः सुभूते बोधिसत्त्वो ऽप्रतिष्ठितो दानं ददाति तस्य सुभूते पुण्यस्कंधस्य न सुकरं प्रमाणमुद्ग्रहीतुं[4]। तत्किं मन्यसे सुभूते सुकरं पूर्वस्यां दिश्याकाशस्य प्रमाणमुद्ग्रहीतुं। सुभूतिराह। नो हीदं भगवन्। भगवानाह। एवं दक्षिणपश्चिमोत्तरास्वध ऊर्ध्वं दिग्विदिक्षु समंताद्दशसु दिक्षु सुकरमाकाशस्य प्रमाणमुद्ग्रहीतुं। सुभूतिराह। नो हीदं भगवन्। भगवानाह। एवमेव सुभूते यो बोधिसत्त्वोऽप्रतिष्ठितो दानं ददाति तस्य सुभूते पुण्यस्कंधस्य न सुकरं प्रमाणमुद्ग्रहीतुं। एवं हि सुभूते बोधिसत्त्वयानसंप्रस्थितेन दानं दातव्यं यथा न निमित्तसंज्ञाया-मपि प्रतितिष्ठेत् ॥४॥

[1] यस्यात्मसंज्ञा सत्वसंज्ञा Ch. T. [2] Cf. § 17. [3] Cf. § 14. [4] The texts always vary between उद्ग्रहीतुं and उद्गृहीतुं, between ग्रहीतव्यं and गृहीतव्यं.

तत्किं मन्यसे सुभूते लक्षणसंपदा तथागता द्रष्टव्यः। सुभूति-
राह। नो हीदं भगवन् न लक्षणसंपदा तथागतो द्रष्टव्यः। तत्कस्
हेतोः। या सा भगवन् लक्षणसंपत्तथागतेन भाषिता सैवालक्ष-
णसंपत्। एवमुक्ते भगवानायुष्मंतं सुभूतिमेतदवोचत्। यावत्सुभूते
लक्षणसंपत्तावन्मृषा यावदलक्षणसंपत्तावन्न मृषेति हि लक्षणा-
लक्षणतस्तथागतो द्रष्टव्यः[1] ॥५॥

एवमुक्त आयुष्मान्सुभूतिर्भगवंतमेतदवोचत्। अस्ति भगवन्के-
चित्सत्त्वा भविष्यंत्यनागतेऽध्वनि पश्चिमे काले पश्चिमे समये
पश्चिमायां पंचशत्यां[2] सद्धर्मविप्रलोपकाले वर्तमाने य इमेष्वे[3]-
वंरूपेषु सूत्रांतपदेषु भाष्यमाणेषु भूतसंज्ञामुत्पादयिष्यंति। भग-
वानाह। मा सुभूते त्वमेवं वोचः[4]। अस्ति केचित्सत्त्वा भवि-
ष्यंत्यनागतेऽध्वनि पश्चिमे काले पश्चिमे समये पश्चिमायां पंच-
शत्यां सद्धर्मविप्रलोपे वर्तमाने य इमेष्वेवंरूपेषु सूत्रांतपदेषु
भाष्यमाणेषु भूतसंज्ञामुत्पादयिष्यंति। अपि तु खलु पुनः सुभूते
भविष्यंत्यनागतेऽध्वनि बोधिसत्त्वा महासत्त्वाः पश्चिमे काले
पश्चिमे समये पश्चिमायां पंचशत्यां सद्धर्मविप्रलोपे वर्तमाने
गुणवंतः शीलवंतः प्रज्ञावंतश्च भविष्यंति य इमेष्वेवंरूपेषु सूत्रां-
तपदेषु भाष्यमाणेषु भूतसंज्ञा[5]मुत्पादयिष्यंति। न खलु पुनस्ते
सुभूते बोधिसत्त्वा महासत्त्वा एकबुद्धपर्युपासिता भविष्यंति नैक-
बुद्धावरोपितकुशलमूला भविष्यंति अपि तु खलु पुनः सुभूते

[1] Cf. §§ 13; 20; 25. [2] पंचाशत्यां Ch. J. T. [3] इमेष्वे° Ch. J. T. [4] वोचत् Ch. वोचः J. वोचद् T. [5] संज्ञा Ch. J. T.

अनेकबुद्धशतसहस्र[1]पर्युपासिता अनेकबुद्धशतसहस्रावरोपितकुशलमूलास्ते बोधिसत्त्वा महासत्त्वा भविष्यंति य इमेष्वेवंरूपेषु सूत्रांतपदेषु भाष्यमाणेष्वेकचित्तप्रसादमपि प्रतिलप्स्यंते। ज्ञातास्ते सुभूते तथागतेन बुद्धज्ञानेन दृष्टास्ते सुभूते तथागतेन बुद्धचक्षुषा बुद्धास्ते सुभूते तथागतेन। सर्वे ते सुभूतेऽप्रमेयमसंख्येयं पुण्यस्कंधं प्रसं[2]विष्यंति प्रतिग्रहीष्यंति। तत्कस्य हेतोः। न हि सुभूते तेषां बोधिसत्त्वानां महासत्त्वानामात्मसंज्ञा प्रवर्तते न सत्त्वसंज्ञा न जीवसंज्ञा न पुद्गलसंज्ञा प्रवर्तते। नापि[3] तेषां सुभूते बोधिसत्त्वानां महासत्त्वानां धर्मसंज्ञा प्रवर्तते। एवं नाधर्मसंज्ञा। नापि तेषां सुभूते संज्ञा नासंज्ञा प्रवर्तते। तत्कस्य हेतोः। सचेत्सुभूते तेषां बोधिसत्त्वानां महासत्त्वानां धर्मसंज्ञा प्रवर्तेत स एव तेषामात्मग्राहो भवेत्सत्त्वग्राहो जीवग्राहः पुद्गलग्राहो भवेत्। सचेदधर्मसंज्ञा प्रवर्तेत स एव तेषामात्मग्राहो भवेत्सत्त्वग्राहो जीवग्राहः पुद्गलग्राह इति। तत्कस्य हेतोः। न खलु पुनः सुभूते बोधिसत्त्वेन महासत्त्वेन धर्म उद्ग्रहीतव्यो नाधर्मः। तस्मादियं तथागतेन संधाय वाग्भाषिता[5]। कोलोपमं धर्मपर्यायमाजा[6]नद्भिर्धर्मा एव प्रहातव्याः प्रागेवाधर्मा इति[7] ॥ ६॥

[1] साहस्र T. [2] प्रभ T. [3] अपि Ch. T. [4] चेद्धर्म Ch. T. [5] दिदं तथागतेन सन्धाय भाषितं J. दिसंसन्वय तथागतेन वग्भषिताः T. दियं सत्वाय तथागतेन वाग्भाषिता। Ch. Hiouen-thsang, as Mr. Kasawara informs me, translates this passage by: 'Therefore it is spoken by the Tathâgata in a *hidden sense.*' On the strength of this and a note of Burnouf's (Lotus, p. 343) I have tried to restore the original text. [6] कोलो° यमाजा° J. अकोलो° यमजा° Ch. T. [7] The Abhidharma-kosha-vyâkhyâ (fol. 18 a) reads धर्मा अपि.

पुनरपरं भगवानायुष्मंतं सुभूतिमेतदवोचत् । तत्किं मन्य
सुभूते अस्ति स कश्चिद्धर्मो यस्तथागतेनानुत्तरा सम्यक्संबोधि
रि[1]त्यभिसंबुद्धः[2] कश्चिद्वा धर्मस्तथागतेन देशितः । एवमुक्त आ
ष्मान्सुभूतिर्भगवंतमेतदवोचत् । यथाहं भगवन्भगवतो भाषि
स्यार्थमाजानामि नास्ति स कश्चिद्धर्मो यस्[3]तथागतेनानुत्त
सम्यक्संबोधिरि[4]त्यभिसंबुद्धः[5] नास्ति धर्मो यस्तथागतेन देशित
तत्कस्य हेतोः । योऽसौ तथागतेन धर्मोऽभिसंबुद्धो देशि
वा अग्राह्यः सोऽनभिलप्यः । न स धर्मो नाधर्मः । तत्क
हेतोः । असंस्कृतप्रभाविता ह्यार्यपुद्गलाः ॥७॥

भगवानाह । तत्किं मन्यसे सुभूते यः कश्चित्कुलपुत्रो वा कुल
दुहिता वेमं[7] त्रिसाहस्रमहासाहस्रं लोकधातुं सप्तरत्नपरिपूर्णं कृ
तथागतेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो दानं दद्यात् अपि नु
कुलपुत्रो वा कुलदुहिता वा ततो निदानं बहु[8] पुण्यस्कं
प्रसुनुयात् । सुभूतिराह । बहु भगवन् बहु सुगत स कुलपु
वा कुलदुहिता वा ततो निदानं पुण्यस्कंधं प्रसुनुयात् । तत्क
हेतोः । योऽसौ भगवन्पुण्यस्कंधस्तथागतेन भाषितः अस्कंधः
तथागतेन भाषितः । तस्मात्तथागतो भाषते पुण्यस्कंधः पुण्यस्कं
इति । भगवानाह । यश्च खलु पुनः सुभूते कुलपुत्रो 
कुलदुहिता वेमं त्रिसाहस्रमहासाहस्रं लोकधातुं सप्तरत्नपरिपू

[1] बोधिरभि Ch. J. T. [2] संबुद्धा J. [3] धर्मस्त Ch. T. [4] धिरभि J. [5] Cf. §§ 17;
[6] भाषितः Ch. भषितः T. [7] J. has इमां, but otherwise लोकधातुः is used througho
as a masculine. [8] बहुतर Ch. T.

कृत्वा तथागतेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो दानं दद्यात् यश्चेतो धर्मपर्यायादंतशश्चतुष्पादिकामपि गाथामुद्गृह्य परेभ्यो विस्तरेण देशयेत्संप्रकाशयेदयमेव ततो निदानं बहुतरं पुण्यस्कंधं प्रसुनुयादप्रमेयमसंख्येयं। तत्कस्य हेतोः। अतो निर्जाता हि सुभूते तथागतानामर्हतां सम्यक्संबुद्धानामनुत्तरा सम्यक्संबोधिरतो निर्जाताश्च बुद्धा भगवंतः। तत्कस्य हेतोः। बुद्धधर्मा बुद्धधर्मा इति सुभूतेऽबुद्धधर्माश्चैव ते तथागतेन भाषिताः। तेनोच्यंते बुद्धधर्मा इति ॥८॥

तत्किं मन्यसे सुभूते अपि नु स्रोतआपन्नस्यैवं भवति मया स्रोतआपत्तिफलं प्राप्तमिति। सुभूतिराह। नो हीदं भगवन्। न स्रोतआपन्नस्यैवं भवति मया स्रोतआपत्तिफलं प्राप्तमिति। तत्कस्य हेतोः। न हि स भगवन्कंचिद्धर्ममापन्नः। तेनोच्यते स्रोतआपन्न इति। न रूपमापन्नो न शब्दान्न गन्धान्न रसान्न स्प्रष्टव्यान्धर्मानापन्नः। तेनोच्यते स्रोतआपन्न इति। सचेद्भगवन् स्रोतआपन्नस्यैवं भवेन्मया स्रोतआपत्तिफलं प्राप्तमिति स एव तस्यात्मग्राहो भवेत् सत्त्वग्राही जीवग्राहः पुद्गलग्राहो भवेदिति॥

भगवानाह। तत्किं मन्यसे सुभूते अपि नु सकृदागामिन एवं भवति मया सकृदागामिफलं प्राप्तमिति। सुभूतिराह। नो हीदं भगवन् न सकृदागामिन एवं भवति मया सकृदागामिफलं प्राप्तमिति। तत्कस्य हेतोः। न हि स कश्चिद्धर्मो यः सकृदागामित्वमापन्नः। तेनोच्यते सकृदागामीति॥

भगवानाह। तत्किं मन्यसे सुभूते अपि न्वनागामिन एवं

भवति मयानागामिफलं प्राप्तमिति । सुभूतिराह । नो ही
भगवन् नानागामिन एवं भवति मयानागामिफलं प्राप्तमिति
तत्कस्य हेतोः। न हि स भगवन्कश्चिद्धर्मो योऽनागामित्वमापन्न
तेनोच्यतेऽनागामीति ॥

भगवानाह । तत्किं मन्यसे सुभूते अपि न्वर्हत एवं भव
मयार्हत्त्वं प्राप्तमिति । सुभूतिराह । नो हीदं भगवन् नार्हत ए
भवति मयार्हत्त्वं प्राप्तमिति । तत्कस्य हेतोः । न हि स भगवन्
श्चिद्धर्मो योऽर्हन्नाम । तेनोच्यतेऽर्हन्निति । सचेद्भगवन्नर्हत ए
भवेन्मयार्हत्त्वं प्राप्तमिति स एव तस्यात्मग्राहो भवेत् सत्त्वग्रा
जीवग्राहः पुद्गलग्राहो भवेत् ॥

तत्कस्य हेतोः । अहमस्मि भगवंस्तथागतेनार्हता सम्यक्स
बुद्धेनारणाविहारिणामग्र्यो निर्दिष्टः । अहमस्मि भगवन्नर्हन्वी
तरागः । न च मे भगवन्नेवं भवति अर्हन्नस्म्यहं वीतराग इति
सचेन्मम भगवन्नेवं भवेन्मयार्हत्त्वं प्राप्तमिति न मां तथाग
व्याकरिष्यदरणाविहारिणामग्र्यः सुभूतिः कुलपुत्रो न क्वचिद्वि
रति तेनोच्यतेऽरणाविहार्यरणाविहारीति ॥९॥

भगवानाह । तत्किं मन्यसे सुभूते अस्ति स कश्चिद्धर्मो यस्
थागतेन दीपंकरस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यांतिकादु
हीतः । सुभूतिराह । नो हीदं भगवन् नास्ति स कश्चिद्ध
यस्तथागतेन दीपंकरस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यांति
कादुद्गृहीतः[1] ॥

[1] Cf. § 17.

भगवानाह। यः कश्चित्सुभूते बोधिसत्त्व एवं वदेदहं क्षेत्रव्यूहान्निष्पादयिष्यामीति[1] स वितथं वदेत्। तत्कस्य हेतोः। क्षेत्रव्यूहाः क्षेत्रव्यूहा इति सुभूतेऽव्यूहास्ते तथागतेन भाषिताः। तेनोच्यंते क्षेत्रव्यूहा इति॥

तस्मात्तर्हि सुभूते बोधिसत्त्वेन महासत्त्वेनैवमप्रतिष्ठितं चित्तमुत्पादयितव्यं यन्न क्वचित्प्रतिष्ठितं चित्तमुत्पादयितव्यं न रूपप्रतिष्ठितं चित्तमुत्पादयितव्यं न शब्दगंधरसस्प्रष्टव्यधर्मप्रतिष्ठितं चित्तमुत्पादयितव्यं। तद्यथापि नाम सुभूते पुरुषो भवेदुपेतकायो महाकायो यत्तस्यैवंरूप आत्मभावः स्यात्[2] तद्यथापि नाम सुमेरुः पर्वतराजः तत्किं मन्यसे सुभूते अपि नु महान्स आत्मभावो भवेत्। सुभूतिराह। महान्स भगवन्महान्सुगत स आत्मभावो भवेत्। तत्कस्य हेतोः। आत्मभाव आत्मभाव इति भगवन्न भावः स तथागतेन भाषितः। तेनोच्यत आत्मभाव इति। न हि भगवन्स भावो नाभावः। तेनोच्यत आत्मभाव इति ॥१०॥

भगवानाह। तत्किं मन्यसे सुभूते यावत्यो गंगायां महानद्यां वालुकास्तावत्य एव गंगानद्यो भवेयुः तासु या वालुका अपि नु ता बह्व्यो भवेयुः। सुभूतिराह। ता एव तावद्भगवन्बह्व्यो गंगानद्यो भवेयुः प्रागेव यास्तासु गंगानदीषु वालुकाः। भगवानाह। आरोचयामि ते सुभूते प्रतिवेदयामि ते यावत्यस्तासु गंगानदीषु वालुका भवेयुस्तावतो लोकधातून्कश्चिदेव स्त्री वा पुरुषो वा सप्तरत्नपरिपूर्णं कृत्वा तथागतेभ्योऽर्हद्भ्यः सम्यक्सं-

[1] ष्यामि J. ष्यमति Ch. ष्यमिति T. [2] Cf. § 17.

बुद्धेभ्यो दानं दद्यात् तत्किं मन्यसे सुभूते अपि नु सा स्त्री व
पुरुषो वा ततो निदानं बहु पुण्यस्कंधं प्रसुनुयात्। सुभूतिराह
बहु भगवन्बहु सुगत स्त्री वा पुरुषो वा ततो निदानं पुण्यस्कं
प्रसुनुयादप्रमेयमसंख्येयं। भगवानाह। यश्च खलु पुनः सुभूते स्त्री
वा पुरुषो वा तावतो लोकधातून्सप्तरत्नपरिपूर्णं कृत्वा तथाग
तेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो दानं दद्यात् यश्च कुलपुत्रो व
कुलदुहिता वेतो धर्मपर्यायादंतशश्चतुष्पादिकामपि गाथामुद्गृह
परेभ्यो देशयेत्संप्रकाशयेदयमेव ततो निदानं बहुतरं पुण्यस्कं
प्रसुनुयादप्रमेयमसंख्येयं ॥११॥

अपि तु खलु पुनः सुभूते यस्मिन्पृथिवीप्रदेश इतो धर्मपर्या
यादंतशश्चतुष्पादिकामपि गाथामुद्गृह्य भाषेत वा संप्रकाश्येत
वा स पृथिवीप्रदेशश्चैत्यभूतो भवेत्सदेवमानुषासुरस्य लोकस्य क
पुनर्वादो य इमं धर्मपर्यायं सकलसमाप्तं धारयिष्यंति वाच
यिष्यंति पर्यवाप्स्यंति परेभ्यश्च विस्तरेण संप्रकाशयिष्यंति। पर
मेण ते सुभूत आश्चर्येण समन्वागता भविष्यंति। तस्मिंश्च सुभू
पृथिवीप्रदेशे शास्ता विहरत्यन्यतरान्यतरो वा विज्ञगुरुस्था
नीयः[1] ॥१२॥

एवमुक्त आयुष्मान्सुभूतिर्भगवंतमेतदवोचत्। को नामा
भगवन्धर्मपर्यायः कथं चैनं धारयामि। एवमुक्ते भगवाना
युष्मंतं सुभूतिमेतदवोचत्। प्रज्ञापारमिता नामायं सुभूते धर्म
पर्यायः। एवं चैनं धारय। तत्कस्य हेतोः। यैव सुभूते प्रज्ञापा

[1] Cf. § 15.

रमिता तथागतेन भाषिता सैवापारमिता तथागतेन भाषिता। तेनोच्यते प्रज्ञापारमितेति ॥

तत्किं मन्यसे सुभूते ऽपि न्वस्ति स कश्चिद्धर्मो यस्तथागतेन भाषितः। सुभूतिराह। नो हीदं भगवन् नास्ति स कश्चिद्धर्मो यस्तथागतेन भाषितः ॥

भगवानाह। तत्किं मन्यसे सुभूते यावत् त्रिसाहस्रमहासाहस्रे लोकधातौ पृथिवीरजः कच्चित्तद्बहु भवेत्। सुभूतिराह। बहु भगवन्बहु सुगत पृथिवीरजो भवेत्। तत्कस्य हेतोः। यत्तद्भगवन्पृथिवीरजस्तथागतेन भाषितमरजस्तद्भगवंस्तथागतेन भाषितं। तेनोच्यते पृथिवीरज इति ॥ यो ऽप्यसौ लोकधातुस्तथागतेन भाषितो ऽधातुः स तथागतेन भाषितः। तेनोच्यते लोकधातुरिति ॥

भगवानाह। तत्किं मन्यसे सुभूते द्वात्रिंशन्महापुरुषलक्षणैस्तथागतो ऽर्हन्सम्यक्संबुद्धो द्रष्टव्यः। सुभूतिराह। नो हीदं भगवन् द्वात्रिंशन्महापुरुषलक्षणैस्तथागतो ऽर्हन्सम्यक्संबुद्धो द्रष्टव्यः। तत्कस्य हेतोः। यानि हि तानि भगवन् द्वात्रिंशन्महापुरुषलक्षणानि तथागतेन भाषितान्यलक्षणानि तानि भगवंस्तथागतेन भाषितानि। तेनोच्यंते द्वात्रिंशन्महापुरुषलक्षणानीति[1] ॥

भगवानाह। यश्च खलु पुनः सुभूते स्त्री वा पुरुषो वा दिने दिने गंगानदीवालुकासमानात्मभावान्परित्यजेत् एवं परित्यजन्गंगानदीवालुकासमान्कल्पांस्तानात्मभावान्परित्यजेत् यश्चेतो

[1] Cf. §§ 5; 20; 25.

धर्मपर्यायादंतशश्चतुष्पादिकामपि गाथामुद्गृह्य परेभ्यो देशयेत्संप्रकाशयेदयमेव ततो निदानं बहुतरं पुण्यस्कंधं प्रसुनुयादप्रमेयमसंख्येयं ॥१३॥

अथ खल्वायुष्मान्सुभूतिर्धर्मवेगेनाश्रूणि प्रामुंचत् सोऽश्रूणि प्रमृज्य भगवंतमेतदवोचत् । आश्चर्यं भगवन्परमाश्चर्यं सुगत यावदयं धर्मपर्यायस्तथागतेन भाषितोऽग्रयानसंप्रस्थितानां सत्त्वानामर्थाय श्रेष्ठयानसंप्रस्थितानामर्थाय[1] यतो मे भगवञ्ज्ञानमुत्पन्नं। न मया भगवञ्जात्वेवंरूपो धर्मपर्यायः श्रुतपूर्वः। परमेण ते भगवन्नाश्चर्येण समन्वागता बोधिसत्त्वा भविष्यंति य इह सूत्रे भाष्यमाणे श्रुत्वा भूतसंज्ञामुत्पादयिष्यंति । तत्कस्य हेतोः । या चैषा भगवन्भूतसंज्ञा सैवाभूतसंज्ञा । तस्मात्तथागतो भाषते भूतसंज्ञा भूतसंज्ञेति ॥

न मम भगवन्नाश्चर्यं[2] यदाहमिमं धर्मपर्यायं भाष्यमाणमवकल्पयाम्यधिमुच्ये। येऽपि ते भगवन्सत्त्वा भविष्यंत्यनागतेऽध्वनि पश्चिमे काले पश्चिमे समये पश्चिमायां पंचशत्यां सद्धर्मविप्रलोपे वर्तमाने य इमं भगवन्धर्मपर्यायमुद्ग्रहीष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यंति परेभ्यश्च विस्तरेण संप्रकाशयिष्यंति ते परमाश्चर्येण समन्वागता भविष्यंति ॥

अपि तु खलु पुनर्भगवन्न तेषामात्मसंज्ञा प्रवर्तिष्यते[3] न सत्त्वसंज्ञा न जीवसंज्ञा न पुद्गलसंज्ञा प्रवर्तिष्यते नापि तेषां काचित्संज्ञा नासंज्ञा प्रवर्तते। तत्कस्य हेतोः। या सा भगवन्नात्म-

[1] Cf. § 15.  [2] After आश्चर्यं J. has भवेत्.  [3] प्रवर्तते Ch. T.

संज्ञा सैवासंज्ञा। या सत्त्वसंज्ञा जीवसंज्ञा पुद्गलसंज्ञा सैवासंज्ञा। तत्कस्य हेतोः। सर्वसंज्ञापगता हि बुद्धा भगवंतः॥

एवमुक्ते भगवानायुष्मंतं सुभूतिमेतदवोचत्। एवमेतत् सुभूते एवमेतत्। परमाश्चर्यसमन्वागतास्ते सत्त्वा भविष्यंति य इह सुभूते सूत्रे भाष्यमाणे नोत्त्रसिष्यंति न संत्रसिष्यंति न संत्रासमापत्स्यंते। तत्कस्य हेतोः। परमपारमितेयं सुभूते तथागतेन भाषिता यदुतापारमिता। यां च सुभूते तथागतः परमपारमितां भाषते[1] तामपरिमाणा अपि बुद्धा भगवंतो भाषंते। तेनोच्यते परमपारमितेति॥

अपि तु खलु पुनः सुभूते या तथागतस्य क्षांतिपारमिता सैवापारमिता। तत्कस्य हेतोः। यदा मे सुभूते कलिंगराजा[2]ंगप्रत्यंगमांसान्यच्छैत्सीत्तस्मिन्समय आत्मसंज्ञा वा सत्त्वसंज्ञा वा जीवसंज्ञा वा पुद्गलसंज्ञा वा नापि मे काचित्संज्ञा वासंज्ञा वा बभूव। तत्कस्य हेतोः। सचेन्मे सुभूते तस्मिन्समय आत्मसंज्ञाभविष्यद्व्यापादसंज्ञापि मे तस्मिन्समयेऽभविष्यत्। सचेत्सत्त्वसंज्ञा जीवसंज्ञा पुद्गलसंज्ञाभविष्यद्व्यापादसंज्ञापि मे तस्मिन्समयेऽभविष्यत्। तत्कस्य हेतोः। अभिजानाम्यहं सुभूतेऽतीतेऽध्वनि पंच जातिशतानि यदहं क्षांतिवादी ऋषिरभूवं। तत्रापि मे नात्मसंज्ञा बभूव न सत्त्वसंज्ञा न जीवसंज्ञा न पुद्गलसंज्ञा बभूव। तस्मात्तर्हि सुभूते बोधिसत्त्वेन महासत्त्वेन सर्वसंज्ञा

[1] भाषितः यां च तथागतः परमपारमितन भाषिते J. [2] Eitel, Handbook of Chinese Buddhism, pp. 49 and 55, gives कालिराज, and this, as Mr. Nanjio informs me, is the reading presupposed by the Chinese translations. One Chinese transliteration, however, points to Kaliṅga-râ*g*â. कलिंग Ch. J. T.

विवर्जयित्वानुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयितव्यं। न रूपप्रतिष्ठितं चित्तमुत्पादयितव्यं न शब्दगंधरसस्प्रष्टव्यधर्मप्रतिष्ठितं चित्तमुत्पादयितव्यं न धर्मप्रतिष्ठितं चित्तमुत्पादयितव्यं नाधर्मप्रतिष्ठितं चित्तमुत्पादयितव्यं न क्वचित्प्रतिष्ठितं चित्तमुत्पादयितव्यं । तत्कस्य हेतोः । यत्प्रतिष्ठितं तदेवाप्रतिष्ठितं । तस्मादेव तथागतो भाषते अप्रतिष्ठितेन बोधिसत्त्वेन दानं दातव्यं । न रूपशब्दगंधरसस्पर्शधर्मप्रतिष्ठितेन दानं दातव्यं[1] ॥

अपि तु खलु पुनः सुभूते बोधिसत्त्वेनैवंरूपो दानपरित्यागः कर्तव्यः सर्वसत्त्वानामर्थाय। तत्कस्य हेतोः। या चैषा सुभूते सत्त्वसंज्ञा सैवासंज्ञा । य एवं ते सर्वसत्त्वास्तथागतेन भाषितास्त एवासत्त्वाः। तत्कस्य हेतोः[2]। भूतवादी सुभूते तथागतः सत्यवादी तथावाद्यनन्यथावादी तथागतः। न वितथवादी तथागतः ॥

अपि तु खलु पुनः सुभूते यस्तथागतेन धर्मोऽभिसंबुद्धो देशितो निध्यातो न तत्र सत्यं न मृषा। तद्यथापि नाम सुभूते पुरुषोऽंधकारप्रविष्टो न किंचिदपि पश्येत् एवं वस्तुपतितो बोधिसत्त्वो द्रष्टव्यो यो वस्तुपतितो दानं परित्यजति। तद्यथापि नाम सुभूते चक्षुष्मान्पुरुषः प्रभातायां रात्रौ सूर्येऽभ्युद्गते नानाविधानि रूपाणि पश्येत् एवमवस्तुपतितो बोधिसत्त्वो द्रष्टव्यो योऽवस्तुपतितो दानं परित्यजति ॥

अपि तु खलु पुनः सुभूते ये कुलपुत्रा वा कुलदुहितरो वेमं धर्मपर्यायमुद्ग्रहीष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यंति

[1] Cf. § 4.  [2] तत्कस्य हेतोः left out here in Ch. T.

परेभ्यश्च विस्तरेण संप्रकाशयिष्यंति ज्ञातास्ते सुभूते तथागतेन बुद्धज्ञानेन दृष्टास्ते सुभूते तथागतेन बुद्धचक्षुषा बुद्धास्ते तथागतेन। सर्वे ते सुभूते सत्त्वा अप्रमेयमसंख्येयं पुण्यस्कंधं प्रसविष्यंति प्रतिग्रहीष्यंति ॥ १४ ॥

यश्च खलु पुनः सुभूते स्त्री वा पुरुषो वा पूर्वाह्णकालसमये गंगानदीवालुकासमानात्मभावान्परित्यजेत् एवं मध्याह्नकालसमये गंगानदीवालुकासमानात्मभावान्परित्यजेत् सायाह्नकालसमये गंगानदीवालुकासमानात्मभावान्परित्यजेत्[1] अनेन पर्यायेण बहूनि कल्पकोटिनियुतशतसहस्राण्यात्मभावान्परित्यजेत् यश्चेमं धर्मपर्यायं श्रुत्वा न प्रतिक्षिपेत् अयमेव ततो निदानं बहुतरं पुण्यस्कंधं प्रसुनुयादप्रमेयमसंख्येयं। कः पुनर्वादो यो लिखित्वोद्गृह्णीयाद्धारयेद्वाचयेत्पर्यवाप्नुयात्परेभ्यश्च विस्तरेण संप्रकाशयेत् ॥

अपि तु खलु पुनः सुभूते अचिंत्योऽतुल्योऽयं धर्मपर्यायः। अयं च सुभूते धर्मपर्यायस्तथागतेन भाषितोऽग्रयानसंप्रस्थितानां सत्त्वानामर्थाय श्रेष्ठयानसंप्रस्थितानां सत्त्वानामर्थाय[2]। य[3] इमं धर्मपर्यायमुद्ग्रहीष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यंति परेभ्यश्च विस्तरेण संप्रकाशयिष्यंति ज्ञातास्ते सुभूते तथागतेन बुद्धज्ञानेन दृष्टास्ते सुभूते तथागतेन बुद्धचक्षुषा बुद्धास्ते तथागतेन।

[1] From सायाह्न to परित्यजेत् left out in Ch. and T. The Chinese and Tibetan texts write वालुकोपम instead of वालिकासम, and the same variation occurs in other Buddhist texts. [2] Cf. § 14. [3] य deest in J. Ch. T.

सर्वे ते सुभूते सत्त्वा अप्रमेयेण पुण्यस्कंधेन समन्वागता भविष्यंति
अचिंत्येनातुल्येनामाप्येनापरिमाणेन पुण्यस्कंधेन समन्वागत
भविष्यंति। सर्वे ते सुभूते सत्त्वाः समांशेन बोधिं धारयिष्यं
वाचयिष्यंति पर्यवाप्स्यंति। तत्कस्य हेतोः। न हि शक्यं सुभूते ऽ
धर्मपर्यायो हीनाधिमुक्तिकैः सत्त्वैः श्रोतुं नात्मदृष्टिकैर्न सत्त्वदृष्टि
कैर्न जीवदृष्टिकैर्न पुद्गलदृष्टिकैः। नाबोधिसत्त्वप्रतिज्ञैः सत्त्वै
शक्यमयं धर्मपर्यायः श्रोतुं वोद्ग्रहीतुं वा धारयितुं वा वाचयि
वा पर्यवाप्तुं वा। नेदं स्थानं विद्यते ॥

अपि तु खलु पुनः सुभूते यत्र पृथिवीप्रदेश इदं सूत्रं प्रकाश
यिष्यते पूजनीयः स पृथिवीप्रदेशो भविष्यति सदेवमानुषासुर
लोकस्य वंदनीयः प्रदक्षिणीयश्च स पृथिवीप्रदेशो भविष्य
चैत्यभूतः स पृथिवीप्रदेशो भविष्यति[1] ॥१५॥

अपि तु ये ते सुभूते कुलपुत्रा वा कुलदुहितरो वेमानेवं
पान्सूत्रांतानुद्ग्रहीष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यं
योनिशश्च मनसिकरिष्यंति परेभ्यश्च विस्तरेण संप्रकाशयिष्यं
ते परिभूता भविष्यंति सुपरिभूताश्च भविष्यंति। तत्कस्य हेतो
यानि च तेषां सुभूते सत्त्वानां पौर्वजन्मिकान्यशुभानि कर्मा
कृतान्यपायसंवर्तनीयानि दृष्ट एव धर्मे परिभूततया तानि पौर्वज
न्मिकान्यशुभानि कर्माणि क्षपयिष्यंति बुद्धबोधिं चानुप्राप्स्यंति
[2]अभिजानाम्यहं सुभूते अतीतेऽध्वन्यसंख्येयैः कल्पैरसंख्ये
यतरैर्दीपंकरस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य परेण प

[1] Cf. § 12. [2] तत्कस्य हेतोः Ch. T. before अभिजानाम्यहं.

तरेण चतुरशीतिबुद्धकोटिनियुतशतसहस्राण्यभूवन्ये मयारागिता आराग्य[1] न विरागिताः । यच्च मया सुभूते ते बुद्धा भगवंत आरागिता आराग्य न विरागिता यच्च पश्चिमे काले पश्चिमे समये पश्चिमायां पंचशत्यां सद्धर्मविप्रलोपकाले वर्तमान[2] इमानेवंरूपान्सूत्रांतानुद्ग्रहीष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यंति परेभ्यश्च विस्तरेण संप्रकाशयिष्यंति अस्य खलु पुनः सुभूते पुण्यस्कंधस्यांतिकादसौ पौर्वकः पुण्यस्कंधः शततमीमपि कलां नोपैति सहस्रतमीमपि शतसहस्रतमीमपि कोटितमीमपि कोटिशततमीमपि कोटिशतसहस्रतमीमपि कोटिनियुतशतसहस्रतमीमपि संख्यामपि कलामपि गणनामप्युपमामप्युपनिषदमपि[3] यावदौपम्यमपि न क्षमते ॥

सचेत्पुनः सुभूते तेषां कुलपुत्राणां कुलदुहितॄणां वाहं पुण्यस्कंधं भाषेयं यावत्ते कुलपुत्रा वा कुलदुहितरो वा तस्मिन्समये पुण्यस्कंधं प्रसविष्यंति प्रतिग्रहीष्यंति उन्मादं सत्त्वा अनुप्राप्नुयुश्चित्तविक्षेपं वा गच्छेयुः । अपि तु खलु पुनः सुभूते अचिंत्योऽतुल्योऽयं धर्मपर्यायस्तथागतेन भाषितः । अस्याचिंत्य एव विपाकः प्रतिकांक्षितव्यः ॥१६॥

अथ खल्वायुष्मान्सुभूतिर्भगवंतमेतदवोचत् । कथं भगवन्बोधिसत्त्वयानसंप्रस्थितेन स्थातव्यं कथं प्रतिपत्तव्यं कथं चित्तं प्रग्रहीतव्यं[4] । भगवानाह । इह सुभूते बोधिसत्त्वयानसंप्रस्थितेनैवं

[1] Instead of आरागिता आराग्य etc. J. has आराधिता आराध्य etc., but विरागिताः.
[2] न इमान् deest in J. ने य इमान् Ch. T. [3] निषदमपि Ch. T. निशामपि J. [4] Cf. § 2.

चित्तमुत्पादयितव्यं सर्वे सत्त्वा मयानुपधिशेषे निर्वाणधातौ परिनिर्वापयितव्याः। एवं च सत्त्वान्परिनिर्वाप्य न कश्चित्सत्त्वः परिनिर्वापितो भवति। तत्कस्य हेतोः। सचेत्सुभूते बोधिसत्त्वस्य सत्त्वसंज्ञा प्रवर्तेत न स बोधिसत्त्व इति वक्तव्यः। जीवसंज्ञा वा यावत्पुद्गलसंज्ञा वा प्रवर्तेत न स बोधिसत्त्व इति वक्तव्यः[1]। तत्कस्य हेतोः। नास्ति सुभूते स कश्चिद्धर्मो यो बोधिसत्त्वयान-संप्रस्थितो नाम॥

तत्किं मन्यसे सुभूते अस्ति स कश्चिद्धर्मो यस्तथागतेन दीपं-करस्य तथागतस्यांतिकादनुत्तरां सम्यक्संबोधिमभिसंबुद्धः। एवमुक्त आयुष्मान्सुभूतिर्भगवंतमेतदवोचत्। यथाहं भगवन् भगवतो भाषितस्यार्थमाजानामि नास्ति स भगवन्कश्चिद्धर्मो यस्तथागतेन दीपंकरस्य तथागतस्यार्हतः सम्यक्संबुद्धस्यांति-कादनुत्तरां सम्यक्संबोधिमभिसंबुद्धः। एवमुक्ते भगवानायुष्मंतं सुभूतिमेतदवोचत्। एवमेतत्सुभूते एवमेतत् नास्ति सुभूते स कश्चिद्धर्मो यस्तथागतेन दीपंकरस्य तथागतस्यार्हतः सम्यक्सं-बुद्धस्यांतिकादनुत्तरां सम्यक्संबोधिमभिसंबुद्धः[2]। सचेत्पुनः सुभूते कश्चिद्धर्मस्तथागतेनाभिसंबुद्धोऽभविष्यत्[3] न मां दीपंकरस्तथा-गतो व्याकरिष्यद्भविष्यसि त्वं माणवानागतेऽध्वनि शाक्यमुनिर्नाम तथागतोऽर्हन्सम्यक्संबुद्ध इति। यस्मात्तर्हि सुभूते तथागतेनार्हता सम्यक्संबुद्धेन नास्ति स कश्चिद्धर्मो योऽनुत्तरां सम्यक्संबोधि-मभिसंबुद्धस्तस्मादहं दीपंकरेण तथागतेन व्याकृतो भविष्यसि

[1] Cf. § 3. [2] Cf. § 10. [3] ष्यात् Ch. J. ष्येत् J. [4] मानवा J. Deest in Ch. T.

त्वं माणवानागतेऽध्वनि शाक्यमुनिर्नाम तथागतोऽर्हन्सम्यक्संबुद्धः ॥

तत्कस्य हेतोस्तथागत इति सुभूते। भूततथताया[1] एतदधिवचनं। तथागत इति सुभूते। अनुत्पादधर्मताया एतदधिवचनं। तथागत इति[2] सुभूते। धर्मोच्छेद[3]स्यैतदधिवचनं। तथागत इति सुभूते। अत्यंतानुत्पन्नस्यैतदधिवचनं ॥

तत्कस्य हेतोः। एष सुभूतेऽनुत्पादो यः परमार्थः। यः कश्चित्सुभूत एवं वदेत्तथागतेनार्हता सम्यक्संबुद्धेनानुत्तरा सम्यक्संबोधिरभिसंबुद्धेति स वितथं वदेत् अभ्याचक्षीत मां स सुभूते असतोद्गृहीतेन। तत्कस्य हेतोः। नास्ति सुभूते स कश्चिद्धर्मो यस्तथागतेनानुत्तरां सम्यक्संबोधिमभिसंबुद्धः[4]। यश्च सुभूते तथागतेन धर्मोऽभिसंबुद्धो देशितो वा तत्र न सत्यं न मृषा। तस्मात्तथागतो भाषते सर्वधर्मा बुद्धधर्मा इति[5]। तत्कस्य हेतोः। सर्वधर्मा इति सुभूते अधर्मास्तथागतेन भाषिताः। तस्मादुच्यंते सर्वधर्मा बुद्धधर्मा इति॥

तद्यथापि नाम सुभूते पुरुषो भवेदुपेतकायो महाकायः। आयुष्मान्सुभूतिराह। योऽसौ भगवंस्तथागतेन पुरुषो भाषित उपेतकायो महाकाय इति अकायः स भगवंस्तथागतेन भाषितः। तेनोच्यत उपेतकायो महाकाय इति[6] ॥

भगवानाह। एवमेतत्सुभूते। यो बोधिसत्त्व एवं वदेदहं सत्त्वान्परिनिर्वापयिष्यामीति न स बोधिसत्त्व इति वक्तव्यः।

[1] तथागतताया J. [2] भगवानिति Ch. [3] धर्मोपच्छेद T. [4] Cf. §§ 7; 22.
[5] सर्वधर्मा इति Ch. सर्वधर्म इति T. सर्वधर्म बुद्धधर्म इति J. [6] Cf. § 10.

तत्कस्य हेतोः। अस्ति सुभूते स कश्चिद्धर्मो यो बोधिसत्त्वो नाम
सुभूतिराह। नो हीदं भगवन् नास्ति स कश्चिद्धर्मो यो बोधिसत्त्वो
नाम। भगवानाह। सत्त्वाः सत्त्वा इति सुभूते असत्त्वास्ते तथागतेन
भाषितास्तेनोच्यंते सत्त्वा इति। तस्मात्तथागतो भाषते निरात्मानः
सर्वधर्मा[1] निर्जीवा निष्पोषा[2] निष्पुद्गलाः सर्वधर्मा इति॥

यः सुभूते बोधिसत्त्व एवं वदेदहं क्षेत्रव्यूहान्निष्पादयिष्यामीति
स वितथं वदेत्[3]। तत्कस्य हेतोः। क्षेत्रव्यूहा क्षेत्रव्यूहा इति सुभूते
अव्यूहास्ते तथागतेन भाषिताः। तेनोच्यंते क्षेत्रव्यूहा इति॥

यः सुभूते बोधिसत्त्वो निरात्मानो धर्मा निरात्मानो धर्मा
इत्यधिमुच्यते स तथागतेनार्हता सम्यक्संबुद्धेन बोधिसत्त्वो
महासत्त्व इत्याख्यातः॥१७॥

भगवानाह। तत्किं मन्यसे सुभूते संविद्यते तथागतस्य मांस-
चक्षुः। सुभूतिराह। एवमेतद्भगवन् संविद्यते तथागतस्य मांस-
चक्षुः। भगवानाह। तत्किं मन्यसे सुभूते संविद्यते तथागतस्य
दिव्यं चक्षुः। सुभूतिराह। एवमेतद्भगवन् संविद्यते तथागतस्य
दिव्यं चक्षुः। भगवानाह। तत्किं मन्यसे सुभूते संविद्यते तथा-
गतस्य प्रज्ञाचक्षुः। सुभूतिराह। एवमेतद्भगवन् संविद्यते
तथागतस्य प्रज्ञाचक्षुः। भगवानाह। तत्किं मन्यसे सुभूते संविद्यते
तथागतस्य धर्मचक्षुः। सुभूतिराह। एवमेतद्भगवन् संविद्यते
तथागतस्य धर्मचक्षुः। भगवानाह। तत्किं मन्यसे सुभूते

[1] निस्सत्त्व सर्वधर्मः J. [2] निष्पोषा deest in J.; translated by Kumâragîva. See Childers s. v. poriso. [3] सोऽपि तथैव वक्तव्यः J.

संविद्यते तथागतस्य बुद्धचक्षुः। सुभूतिराह। एवमेतद्भगवन्संविद्यते तथागतस्य बुद्धचक्षुः ॥

भगवानाह[1]। तत्किं मन्यसे सुभूते यावत्यो गंगायां महानद्यां वालुका अपि नु ता वालुकास्तथागतेन भाषिताः। सुभूतिराह। एवमेतद्भगवन्नेवमेतत्सुगत भाषितास्तथागतेन वालुकाः। भगवानाह। तत्किं मन्यसे सुभूते यावत्यो गंगायां महानद्यां वालुकास्तावत्य एव गंगानद्यो भवेयुः तासु या वालुकास्तावंतश्च लोकधातवो भवेयुः कच्चिद्बहवस्ते लोकधातवो भवेयुः। सुभूतिराह। एवमेतद्भगवन्नेवमेतत्सुगत बहवस्ते लोकधातवो भवेयुः। भगवानाह। यावंतः सुभूते तेषु लोकधातुषु सत्त्वास्तेषामहं नानाभावां चित्तधारां प्रजानामि[2]। तत्कस्य हेतोः। चित्तधारा चित्तधारेति सुभूते अधारैषा तथागतेन भाषिता। तेनोच्यते चित्तधारेति। तत्कस्य हेतोः। अतीतं सुभूते चित्तं नोपलभ्यते। अनागतं चित्तं नोपलभ्यते[3]। प्रत्युत्पन्नं चित्तं नोपलभ्यते॥१८॥

तत्किं मन्यसे सुभूते यः कश्चित्कुलपुत्रो वा कुलदुहिता वेमं त्रिसाहस्रमहासाहस्रं लोकधातुं सप्तरत्नपरिपूर्णं कृत्वा तथागतेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो दानं दद्यात्[4] अपि नु स कुलपुत्रो वा

[1] T. inserts तत्किं मन्यसे सुभूते यावत्यो गंगायां महानद्यां वालुकास्तथागतेन भाषिताः। सुभूतिराह। एवमेतद्भगवं। एवमेतत्सुगत भाषितास्तथागतेन वालुकाः। भगवानाह। साधु साधु सुभूते। Ch. has only साधु साधु सुभूते after भगवानाह। J. gives a shorter text: यावत्यो गंगानद्यां वालिकास्तावन्त्यो गंगानद्यो भवेयुः इति तासु या वालिकास्तावंतश्च लोकधातवो भवेयुः.

[2] प्रजानीयात् Ch. प्रजानीयः J.

[3] T. has वोपलभ्यते three times, Ch. has नो°, वो°, and नो°.

[4] T. repeats तत्किं मन्यसे सुभूते.

कुलदुहिता वा ततो निदानं बहु[1] पुण्यस्कंधं प्रसुनुयात्। सुभू
तिराह। बहु भगवन्बहु सुगत[2]। भगवानाह। एवमेतत्सुभू
एवमेतत् बहु स कुलपुत्रो वा कुलदुहिता वा ततो निदान
[3]पुण्यस्कंधं प्रसुनुयादप्रमेयमसंख्येयं। तत्कस्य हेतोः। पुण्य-
स्कंधः पुण्यस्कंध इति सुभूते अस्कंधः स तथागतेन भाषितः
तेनोच्यते पुण्यस्कंध इति। सचेत्पुनः सुभूते पुण्यस्कंधोऽभविष्यन्न
तथागतोऽभाषिष्यत्[5] पुण्यस्कंधः पुण्यस्कंध इति ॥१९॥

तत्किं मन्यसे सुभूते रूपकायपरिनिष्पत्त्या तथागतो द्रष्टव्यः
सुभूतिराह। नो हीदं भगवन् न रूपकायपरिनिष्पत्त्या तथागतो
द्रष्टव्यः। तत्कस्य हेतोः। रूपकायपरिनिष्पत्ती रूपकायपरिनि-
ष्पत्तिरिति भगवन् अपरिनिष्पत्तिरेषा तथागतेन भाषिता
तेनोच्यते रूपकायपरिनिष्पत्तिरिति ॥

भगवानाह। तत्किं मन्यसे सुभूते लक्षणसंपदा तथागतो द्रष्ट-
व्यः। सुभूतिराह। नो हीदं भगवन् न लक्षणसंपदा तथागतो द्रष्टव्यः
तत्कस्य हेतोः। यैषा भगवँल्लक्षणसंपत्तथागतेन भाषिता अलक्षण-
संपदेषा तथागतेन भाषिता। तेनोच्यते लक्षणसंपदिति[6] ॥२०॥

भगवानाह। तत्किं मन्यसे सुभूते अपि नु तथागतस्यैवं भवति
मया धर्मो देशित इति। [7]सुभूतिराह। नो हीदं भगवन् तथा-
गतस्यैवं भवति मया धर्मो देशित इति। भगवानाह। यः सुभूते

[1] Ch. and T. use बहुतरं instead of बहु. [2] Ch. and T. insert स कुलपुत्रो वा कुलदुहित
वा ततो निदानं बहुतरं पुण्यस्कंधं प्रसुनुयात् as in § 8. [3] Ch. and T. insert बहुतरं.
[4] भविष्यति T. Ch. भविष्येत् J. [5] भाषिष्यत् T. Ch. भाषिष्येत् J. [6] Cf. §§ 5; 13; 25
[7] Instead of सुभूतिराह to यः सुभूते, J. has न खलु पुन एवं द्रष्टव्यं यो मां सुभूते.

एवं वदेत्तथागतेन धर्मो देशित इति स वितथं वदेत् अभ्याचक्षीत मां स सुभूते ऽसतोद्गृहीतेन। तत्कस्य हेतोः। धर्मदेशना धर्मदेशनेति सुभूते नास्ति स कश्चिद्धर्मो यो धर्मदेशना नामोपलभ्यते ॥

एवमुक्त आयुष्मान्सुभूतिर्भगवंतमेतदवोचत्। अस्ति भगवन्केचित्सत्त्वा भविष्यंत्यनागतेऽध्वनि पश्चिमे काले पश्चिमे समये पश्चिमायां पंचशत्यां सद्धर्मविप्रलोपे वर्तमाने य इमानेवंरूपान्धर्मांश्श्रुत्वाभिश्रद्धास्यंति। भगवानाह। न ते सुभूते सत्त्वा नासत्त्वाः। तत्कस्य हेतोः। सत्त्वाः सत्त्वा इति सुभूते सर्वे ते सुभूते असत्त्वास्तथागतेन भाषिताः। तेनोच्यंते सत्त्वा इति ॥२१॥

तत्किं मन्यसे सुभूते अपि न्वस्ति स कश्चिद्धर्मो यस्तथागतेनानुत्तरां सम्यक्संबोधिमभिसंबुद्धः[1]। आयुष्मान्सुभूतिराह। नो हीदं भगवन् नास्ति स भगवन्कश्चिद्धर्मो यस्तथागतेनानुत्तरां सम्यक्संबोधिमभिसंबुद्धः। भगवानाह। एवमेतत्सुभूते एवमेतत् अणुरपि तत्र धर्मो न संविद्यते नोपलभ्यते। तेनोच्यतेऽनुत्तरा सम्यक्संबोधिरिति ॥२२॥

अपि तु खलु पुनः सुभूते समः स धर्मो न तत्र कश्चिद्विषमः। तेनोच्यतेऽनुत्तरा सम्यक्संबोधिरिति। निरात्मत्वेन निःसत्त्वत्वेन निर्जीवत्वेन निष्पुद्गलत्वेन समा सानुत्तरा सम्यक्संबोधिः सर्वैः कुशलैर्धर्मैरभिसंबुध्यते। तत्कस्य हेतोः। कुशला धर्माः कुशला धर्मा इति सुभूते अधर्माश्चैव ते तथागतेन भाषिताः। तेनोच्यंते कुशला धर्मा इति ॥२३॥

[1] Cf. §§ 7; 17.

यश्च खलु पुनः सुभूते स्त्री वा पुरुषो वा यावंतस्त्रिसाहस्र-
महासाहस्रे लोकधातौ सुमेरवः पर्वतराजानस्तावतो राशीन्स-
प्तानां रत्नानामभिसंहृत्य तथागतेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो
दानं दद्यात् यश्च कुलपुत्रो वा कुलदुहिता वेतः प्रज्ञापारमिताय
धर्मपर्यायादंतशश्चतुष्पादिकामपि गाथामुद्गृह्य परेभ्यो देशयेदस्
सुभूते पुण्यस्कंधस्यासौ पौर्वकः पुण्यस्कंधः शततमीमपि कल
नोपैति यावदुपनिषदमपि न क्षमते[1] ॥२४॥

तत्किं मन्यसे सुभूते अपि नु तथागतस्यैवं भवति मया सत्त्वा
परिमोचिता इति। न खलु पुनः सुभूत एवं द्रष्टव्यं। तत्कस्य हेतोः
नास्ति सुभूते कश्चित्सत्त्वो यस्तथागतेन परिमोचितः। यदि पुन
सुभूते कश्चित्सत्त्वोऽभविष्यद्यस्तथागतेन परिमोचितः स्यात् स
एव तथागतस्यात्मग्राहोऽभविष्यत्सत्त्वग्राहो जीवग्राहः पुद्गलग्रा
होऽभविष्यत्। आत्मग्राह इति सुभूते अग्राह एष तथागतेन
भाषितः। स च बालपृथग्जनैरुद्गृहीतः। बालपृथग्जना इति
सुभूते अजना एव ते तथागतेन भाषिताः। तेनोच्यंते बाल-
पृथग्जना इति ॥२५॥

तत्किं मन्यसे सुभूते लक्षणसंपदा तथागतो द्रष्टव्यः। सुभूति
राह। नो हीदं भगवन्। यथाहं भगवतो भाषितस्यार्थमाजानामि
न लक्षणसंपदा तथागतो द्रष्टव्यः[2]। भगवानाह। साधु साधु
सुभूते एवमेतत्सुभूते एवमेतद्यथा वदसि। न लक्षणसंपदा
तथागतो द्रष्टव्यः। तत्कस्य हेतोः। सचेत्पुनः सुभूते लक्षणसंपदा

[1] Cf. § 16.
[2] Cf. §§ 5; 13; 20.

तथागतो द्रष्टव्योऽभविष्यद्राजापि चक्रवर्ती तथागतोऽभविष्यत्। तस्मान्न लक्षणसंपदा तथागतो द्रष्टव्यः। आयुष्मान्सुभूतिर्भगवंतमेतदवोचत्। यथाहं भगवतो भाषितस्यार्थमाजानामि न लक्षणसंपदा तथागतो द्रष्टव्यः। अथ खलु भगवांस्तस्यां वेलायामिमे गाथे अभाषत।

ये मां रूपेण चाद्राक्षुर्ये मां घोषेण चान्वगुः[1]।
मिथ्याप्रहाणप्रसृता न मां द्रक्ष्यंति ते जनाः ॥१॥
धर्मतो बुद्धो द्रष्टव्यो धर्मकाया हि नायकाः।
धर्मता च न[2] विज्ञेया न सा[3] शक्या[4] विजानितुं[5] ॥२॥२६॥

तत्किं मन्यसे सुभूते लक्षणसंपदा तथागतेनानुत्तरा सम्यक्संबोधिरभिसंबुद्धा। न खलु पुनस्ते सुभूत एवं द्रष्टव्यं। तत्कस्य हेतोः। न हि सुभूते लक्षणसंपदा तथागतेनानुत्तरा सम्यक्संबोधिरभिसंबुद्धा स्यात्। न खलु पुनस्ते सुभूते कश्चिदेवं वदेत् बोधिसत्त्वयानसंप्रस्थितैः कस्यचिद्धर्मस्य विनाशः प्रज्ञप्त उच्छेदो वेति। न खलु पुनस्ते सुभूत एवं द्रष्टव्यं। तत्कस्य हेतोः। न बोधिसत्त्वयानसंप्रस्थितैः कस्यचिद्धर्मस्य विनाशः प्रज्ञप्तो नोच्छेदः ॥२७॥

यश्च खलु पुनः सुभूते कुलपुत्रो वा कुलदुहिता वा गंगानदीवालुकासमाँल्लोकधातून्सप्तरत्नपरिपूर्णं कृत्वा तथागतेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो दानं दद्याद्यश्च बोधिसत्त्वो निरात्मकेष्वनुत्पत्ति-

[1] अन्वयुः J. चान्वयो Ch. चान्वयोत् T. [2] च न J. चास्य Ch. T. [3] सा J. स Ch. T. [4] शक्यं J. शक्या Ch. T. [5] जनितुं J. T. See Childers s. v. *gânâti*.

केषु धर्मेषु क्षांतिं प्रतिलभते अयमेव ततो निदानं बहुतरं पुण्यस्कंधं प्रसवेदप्रमेयमसंख्येयं। न खलु पुनः सुभूते बोधिसत्त्वेन महासत्त्वेन पुण्यस्कंधः परिग्रहीतव्यः । आयुष्मान्सुभूतिराह । ननु भगवन्[1] बोधिसत्त्वेन पुण्यस्कंधः परिग्रहीतव्यः। भगवानाह। परिग्रहीतव्यः सुभूते नो ग्रहीतव्यः[2] । तेनोच्यते परिग्रहीतव्य इति ॥२८॥

अपि तु खलु पुनः सुभूते यः कश्चिदेवं वदेत्तथागतो गच्छति वागच्छति वा तिष्ठति वा निषीदति वा शय्यां वा कल्पयति न मे सुभूते भाषितस्यार्थमाजानाति । तत्कस्य हेतोः । तथागत इति सुभूत उच्यते न क्वचिद्गतो न कुतश्चिदागतः[3] । तेनोच्यते तथागतोऽर्हन्सम्यक्संबुद्ध इति ॥२९॥

यश्च खलु पुनः सुभूते कुलपुत्रो वा कुलदुहिता वा यावंति त्रिसाहस्रमहासाहस्रे लोकधातौ पृथिवीरजांसि तावतां लोकधातूनामेवंरूपं मषिं[4] कुर्यात् यावदेवमसंख्येयेन वीर्येण तद्यथापि नाम परमाणुसंचयः तत्किं मन्यसे सुभूते अपि नु बहुः स परमाणुसंचयो भवेत् । सुभूतिराह । एवमेतद्भगवन्नेवमेतत्सुगत । बहुः स परमाणुसंचयो भवेत् । तत्कस्य हेतोः । सचेद्भगवन्बहुः परमाणुसंचयोऽभविष्यत् न भगवानवक्ष्यत्परमाणुसंचय इति । तत्कस्य हेतोः । योऽसौ भगवन्परमाणुसंचयस्तथागतेन भाषितः असंचयः स तथागतेन भाषितः। तेनोच्यते परमाणुसंचय इति ॥

[1] भगवन्न T. भगवं Ch. न नु भगवं J. [2] तोद्गृहीतव्यः J. नोद्गृहीतव्यः Ch. नो गृहीतव्यः T. [3] न क्वचिच्चिदा T. [4] एवंरूपमपि भाग कुर्यात् T. Ch. एवंरूपं मषीं कुर्यात् J.

यश्च तथागतेन भाषितस्त्रिसाहस्रमहासाहस्रो लोकधातुरिति अधातुः स तथागतेन भाषितः। तेनोच्यते त्रिसाहस्रमहासाहस्रो लोकधातुरिति। तत्कस्य हेतोः। सचेद्भगवन् लोकधातुरभविष्यत् स एव पिंडग्राहोऽभविष्यत् यश्चैव पिंडग्राहस्तथागतेन भाषितः अग्राहः स तथागतेन भाषितः। तेनोच्यते पिंडग्राह इति। भगवानाह। पिंडग्राहश्चैव सुभूते अव्यवहारोऽनभिलप्यः। न स धर्मो नाधर्मः। स च बालपृथग्जनैरुद्गृहीतः ॥३०॥

तत्कस्य हेतोः।[1] यो हि कश्चित्सुभूत एवं वदेदात्मदृष्टिस्तथागतेन भाषिता सत्त्वदृष्टिर्जीवदृष्टिः पुद्गलदृष्टिस्तथागतेन भाषिता अपि नु स सुभूते सम्यग्वदमानो वदेत्। सुभूतिराह। नो हीदं भगवन्नो हीदं सुगत न सम्यग्वदमानो वदेत्। तत्कस्य हेतोः। या सा भगवन्नात्मदृष्टिस्तथागतेन भाषिता अदृष्टिः सा तथागतेन भाषिता। तेनोच्यत आत्मदृष्टिरिति ॥

भगवानाह। एवं हि सुभूते बोधिसत्त्वयानसंप्रस्थितेन सर्वधर्मा ज्ञातव्या द्रष्टव्या अधिमोक्तव्याः। तथा च ज्ञातव्या द्रष्टव्या अधिमोक्तव्या यथा न धर्मसंज्ञायामपि प्रत्युपतिष्ठेन्नाधर्मसंज्ञायां। तत्कस्य हेतोः। धर्मसंज्ञा धर्मसंज्ञेति सुभूते असंज्ञैषा तथागतेन भाषिता। तेनोच्यते धर्मसंज्ञेति ॥३१॥

यश्च खलु पुनः सुभूते बोधिसत्त्वो महासत्त्वोऽप्रमेयानसंख्येयाँल्लोकधातून्सप्तरत्नपरिपूर्णं कृत्वा तथागतेभ्योऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो दानं दद्याद्यश्च कुलपुत्रो वा कुलदुहिता वेतः प्रज्ञापार-

[1] तत्कस्य हेतोः before यो हि deest in J.

मिताया धर्मपर्यायादंतशश्चतुष्पादिकामपि गाथामुद्गृह्य धारयेद्देशयेद्वाचयेत्पर्यवाप्नुयात्परेभ्यश्च विस्तरेण संप्रकाशयेदयमेव ततो निदानं बहुतरं पुण्यस्कंधं प्रसुनुयादप्रमेयमसंख्येयं । कथं च संप्रकाशयेत्[1] । तद्यथाकाशे[2]

तारका तिमिरं[3] दीपो मायावश्याय[4]बुद्बुदं ।
स्वप्नं च विद्युदभ्रं च एवं द्रष्टव्यं संस्कृतं[5] ॥

तथा प्रकाशयेत् तेनोच्यते संप्रकाशयेदिति ॥

इदमवोचद्भगवानात्तमनाः । स्थविरसुभूतिस्ते च भिक्षुभिक्षुण्युपासकोपासिकास्ते च बोधिसत्त्वाः[6] सदेवमानुषासुरगंधर्वश्च लोको भगवतो भाषितमभ्यनंदन्निति ॥३२॥

॥ आर्यवज्रच्छेदिका भगवती प्रज्ञापारमिता समाप्ता ॥[7]

[1] संप्रकाश तद्यथाकाशे T. The Japanese text varies considerably, but it may represent the original reading, viz. कथं च संप्रकाशयेत् यथा न प्रकाशयेत् तेनोच्यते संप्रकाशयेत् । तरका तिमिरं दीपो मायावस्यायवुद्बुदा सुपिनं विद्यदभ्रं च पस्येदेवं हि संस्कृत इति ॥ [2] यथाकाशे Ch. [3] रिमिरं Ch. T. [4] मायावश्यय Ch. T. [5] It would be easy to restore the metre by reading पश्येदेवं हि संस्कृतं, but Buddhist poets do not obey the ordinary rules of metre, or rather their rules of quantity in pronunciation differ from those of later grammarians. Svapna, 'dream,' is used as a neuter, like the Pâli supinam. [6] ते च बोधिसत्त्वा deest in J. [7] वज्रच्छेदिकाप्रज्ञापारमिता (सु) त्रं: समाप्तं J.

BIBLIOTHECA · BODLEIANA ·

食　揚　嗟　通

鉢衣　收　足　[illegible]

[illegible]

哆播怛囉𠻺嚩喃引鉢囉底含若也播腦引鉢喇訖

收衣鉢　洗足已

器上絡衣　收攝　兩足洗

敷　如常

[illegible]

灑亍履也伶也使亍捺娜鉢喇哳嚷鉢哆醫嚩亍

敷座　而

坐具世尊　施設　如是

座　結跏趺　端

[illegible]

薩亍洗引鉢哩打引迦亍醯亍傈馹也引馬喇嚟哞

坐

座中　跏趺結　直

身　正顧　對　面　念

[illegible]

亍迦亍行鉢囉泥馱引野阿亍鼻亍毋窩亍薩末叻

身作　現　前　念

J GUGGENHEIM, PHOTO LITHO, OXFORD.

BIBLIOTHECA · BODLEIANA



J. GUGGENHEIM, PHOTO LITHO, OXFORD.

Vagra*kkh*edikâ *from Japan.* (*Catal. Bodl. Japan. No.* 55.)

*Length* 9½ *inches. Height* 11 *inches.*

BIBLIOTHECA BODLEIANA



J. GUGGENHEIM PHOTO LITHO OXFORD.

Vagrakkhedikâ *from Tibet.* (*Imperial Russian Academy.*)

*Length 15¼ inches. Height 2¾ inches.*

BIBLIOTHECA · BODLEIANA



J. GUGGENHEIM, PHOTO-LITHO. OXFORD

Vagrakkhedikâ *from China.* (*Mr. Wylie's Copy.*)

*Length 7¼ inches. Height 7¾ inches.*

BIBLIOTHECA BODLEIANA